हस्ताब्जैरात्त पाशाङ्कुश मदनधनुस्सायकैः विस्फुरन्तीं।।
आपीनोत्तुङ्गहारतटविलुठत्तारहारोज्ज्वलाङ्गीं।
ध्यायेऽम्भोरुहस्थां अरुणिमवसनां ईश्वरीमीश्वराणां।।

आ।बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनां।
पाशाङ्कुशधनुर्बाणं धारयन्तीं शिवां भजे।।

इ।पाशाङ्कुशधनुर्बाणपाणिं अर्कायुतप्रभां।
किंशुकांशुकां देवीं देशिकं वीरमाश्रये।।

ई।ब्रह्मस्वरूपिणीं सर्वमूलभूतां महेश्वरीं।
पाशाङ्कुशेक्षु बाणाढ्यां पराभट्टारिकामहं भजे।।

उ।सूर्यकॊटिसहस्राभां चतुर्बाहुं त्रिलोचनां।
पाशाङ्कुशधनुर्बाणं आद्यशक्तिं विचिन्तये।।

ऊ।संविनमयीं तरुणभानुसहस्रकान्तिं पाशाङ्कुश-प्रवनकार्मुक-पञ्चबाणान्।
ध्याये त्रिलोकजननीं स्वकरैर्दधानां श्रीसुन्दरीं मणिभूषणभूषिताङ्गीं।।

ॠ।चतुर्भुजां चन्द्रचूडां त्रिनेत्रां कुसुमप्रभां
पाशाङ्कुशैक्षवधनुः प्रसून-शरसम्युतां।
त्रैलोक्यसुन्दरीं तुर्यां सर्वाभरणभूषितां
ध्यायाम्यहं महादेवीं गायत्रीं त्रिपुरात्मिकां।।

ॠ। क्वणन्मञ्जीराढ्यां करकलितकाञ्चीगुणलसत्
गुरुश्रोणीबिम्बं तनुतरपलग्नं पृथुकुचं।
क्वणत्कण्ठाकल्पां करकलित पाशाङ्कुश-धनुश्शरं
शोणं धाम स्मितमुखमुपैमि त्रिनयनं।।

ऌ। **रक्तां रक्ताम्बरां रक्तस्रग्विभूषानुलेपनां ।**
पाशाङ्कुशेक्षु कोदण्ड प्रसून विशिखं स्मरे ।।

3) **<u>पाश चाप अङ्कुश बाणः</u>**

अ। जपापुष्पछायां शशिकलाभूषां त्रिनेत्रां
करैः पाशं पौण्ड्रधनुरथ सृणिं पुष्पजशरान्।
तथाछायां लीलां परमशिवपर्यङ्कनिलयां
महाचक्रस्यान्तर्विरचितनिकेतां हृदि भजे।।

4) **<u>अङ्कुश पाश चाप बाणः</u>**

अ।कुङ्कुम पङ्कसमाभां अङ्कुश पाशेक्षुकोदण्डशरां।
पङ्कज मध्यनिषण्णां पङ्केरुहलोचनां परां वन्दे।।

5) **<u>अङ्कुश पाश बाण चापः</u>**

अ।सूर्येन्दुवह्निमय भास्वरपीठगेहां स्वच्छागृहीत सृणिपाश शरेक्षुचापां।
बालेन्दुमौलिमरुणाम्बराढ्यां त्रिनेत्रां नित्यां नमामि महतीं महनीय मूर्तिं।।

6) **<u>चाप अङ्कुश बाण पाश</u>**

अ। बालार्कायुत तेजसां त्रिनयनां रक्ताम्बरोल्लासिनीं
नानालङ्कृति राजमानवपुषां बालोडुराट् शेखरां।
हस्तैरिक्षुधनुस्सृणिं समशरं पाशं मुदा बिभ्रतीं
श्रीचक्रस्थितसुन्दरीं त्रिजगतामाधारभूतां स्मरे।।

7) **<u>चाप बाण अङ्कुश पाश</u>**

अ। उत्तप्तहेमरुचिरां रविचन्द्रवह्निनेत्रां धनुश्शराङ्कुशकामपाशान्।
रम्यैर्भुजैर्दधतीं शिवशक्तिरूपां राजेश्वरी हृदि भजामि धृतेन्दुखण्डां।।

8) **<u>चाप बाण पाश अङ्कुशः</u>**

अ। पुन्नागाम्बुज-जाति-कुन्द- वकुलैः पुष्पैरलङ्कारितां।
तन्वीमिक्षुधनुःप्रसूनविशिखान् पाशाङ्कुशौ बिभ्रतीं।।
कन्यां प्रोद्यदनन्त भोज निलये कल्पेतुरीये शिवे।
नादे नादमये परापरमये त्वां भावयम्यम्बिकां।।

9) **<u>चाप पाश अङ्कुश बाणः</u>**

अ।चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुङ्कुमरागशोणे।
पुण्ड्रेक्षुपाशाङ्कुशपुष्पबाण हस्ते नमस्ते जगदेक मातः।।

आ।जपाकुसुस्मभासुरां त्रिकोणत्रयन्तराल निवासिनीं त्रिपुरसुन्दरीं सेन्दुकां।
कराम्बुजचतुष्टयां मधुरचाप-पाशाङ्कुश-प्रसूनशरशोभिनीं ललितवेषभूषां भजे।।

10) **<u>पाश बाण चाप अङ्कुशः</u>**

अ।सिद्धसिद्धतरु रत्नभूमिका कल्प वृक्षवनवाटिसंवृते।
रत्नसालवलयेन सम्युते तत्र वापिशतकेन संकुले।।
नीपवापिमणिमण्डपे शुभे चण्डभानु शशिकोटि भासुरे।
पाशबाणधनुरङ्कुशान्विते नूपुराम्बसुवेणिकाधरे।।
आदिशिवमञ्छपञ्चकोपरि शङ्कराङ्कमणीपीठिकातटे।
कादिहादिमनुरूपिणीमहं भावयामि परदेवतां शिवां।।

11) **<u>बाण चाप पाश अङ्कुश</u>**

अ। सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां।
समन्दहसितेक्षणां सशरचाप पाशाङ्कुशां।।
अशेषजनमोहिनीं अरुणमाल्यभूषाम्बरां।
जपाकुसुमभासुरां जपविधौ स्मरेदम्बिकां।।

आ। ध्याये कामेश्वराङ्कस्थां कुरुविन्दमणिप्रभां।
शोणाम्बरस्रगालेपां सर्वाङ्गीनविभूषितां।।
सौन्दर्यशेवधिं सेषुचापपाशाङ्कुशोज्ज्वलां।
स्वभाभिरणिमाद्याभिर्सेव्यां सर्वनियामिकां।।
सर्वलोकैक जननीं स्मेरास्यां ललिताम्बिकां।।

इ। पुष्पबाणं च पुण्ड्रेक्षुपाशं चैवाङ्कुशं करैः।
भूषितां पुष्पजालैश्च तुर्याम्बां सर्वदा भजे।।

12) **<u>अङ्कुश चाप पाश बाण</u>**

अ। रक्ताम्भोनिधिमध्यस्थ कल्पतरूद्यानान्तरे मण्डपे।
ध्यायेत्-रत्नमयं तदन्तःतेजोभिरामं महत्।
तस्मिन् चिन्तय श्रीत्रिपुरसुन्दरीं वेधोहरित्र्यम्बकैः वन्द्यां
अङ्कुशचाप-पाश-विशिखान् दोर्भिर्मुदाबिभ्रतीं।।

13) **<u>बाण चाप पाश अङ्कुशः</u>**

अ।लोहितां ललित-बाण-चाप-पाश-सृणिकरैः।
दधानां कामराजाङ्के यन्त्रितां मुदितां स्मरे।।

14) **<u>चाप बाणः</u>**

अ। अतिमधुरचाप हस्तां अपरिमितबाण सौरभ्यां।
अरुणामतिशयकरुणां अभिनवकुलसुन्दरीं वन्दे।।

15) **बाण चापः**

अ।सन्धाय सुमनो बाणान् कर्षतीं ऐक्षवं धनुः।
जगज्जैत्रीं जपारक्तां देवीं वर्णमयीं भजे।।

16) **आयुधाभव**

अ।भूवेश्मगत्रिवृत्तषोडशनागशक्र दिग्युग्मवस्वनलकोणगबिन्दुमध्ये।
सिह्मासनोपरिगततारकपीठमध्ये प्रोत्फुल्लपद्मनिलयां त्रिपुरां भजेऽहं।।

आ।श्रीविद्यां परिपूर्णमेरुशिखरे बिन्दुत्रिकोनोज्ज्वले।
वागीशीश रमेश रुद्रचरणमञ्छेशिवाकारके।।
कामाक्षीं करुणारसाम्बुनिलयां कामेश्वराङ्कस्थितां।
कान्तां चिन्मयकामकोटिपीठनिलयाम श्रीब्रह्मविद्यां भजे।।

दशभुज श्रीषोडशी ध्यानं

चापं चेक्षुमयं प्रसूनविशिखान् पाशाङ्कुशौ-पुस्तकं
माणिक्याक्षस्त्रजवरं मणिमयीं वीणां सरोजद्वये।
पाणिभ्यां अभयं वरं च दधतीं ब्रह्मादिसेव्यां परां
सिन्दूरारुण-विग्रहां भगवतीं-तां षोडशीमाश्रये।।

श्री महाषोडशी ध्यानं

सम्वर्तानल कोटि नीरद रुचां पाशाङ्कुश्माशुगान्
ख़ड्गं मुण्ड्मभयं ऐक्ष्वरीवरं अष्टाभिर्बाहुभिः।
कामेशानशवोपरिस्थितां-सदा-त्र्यक्षां वहन्तींपरां
श्रीचिन्तामणि-बीजराजवपुषीं ध्याये महाषोडशीं।।

--पञ्चब्रह्ममञ्छपादे वायुकोणे-ब्रह्म ईशानकोणे-विष्णु अग्नेयकोणे-रुद्र
निऋतिकोणे-महेशवरौ मञ्छफलकाकार-सदाशिव, तस्यमध्ये जपाकुसुमसंकाशं
त्रिनेत्रं चन्द्ररेखाविभूषितं अधस्तहस्तयोः वामदक्षयोः सर्ववशीकरण वैद्रुम-पाश
सर्वस्तम्भन रौप्याङ्कुशौ ऊर्ध्वयोः दक्षवामयोः पद्म-कैरव-कल्हार- आम्र-अशोकरूप
सर्वजम्भन पञ्चबाण सर्वसम्मोहन पुण्ड्रेक्षु कोदण्ड चापौ धृतं श्रीकामेश्वर
महाभट्टारकं तस्याङ्के सिन्दूरवर्णां त्रिनेत्रां चन्द्ररेखाविभूषितां स्मेरास्यां सदया-

अपाङ्गविभ्रमां अणिमादि सर्व-आवरण देवतावृतां अधस्त हस्तयोः वामदक्षयोः सर्ववशीकरण वैद्रुम-पाश सर्वस्तम्भन रौप्याङ्कुशौ ऊर्ध्वयोः दक्षवामयोः पद्म-कैरव-कल्हार-आम्र-अशोकरूप सर्वजम्भन पञ्चबण सर्वसम्मोहन पुण्ड्रेक्षुकोदण्डचापौ धृतां **उपदेशकाले यादृशं गुरोः मुखस्वरूपं तादृशमेव श्री ललिता महात्रिपुरसुन्दरी पराभट्टारिका परदेवतायाः मुखाकृति स्वरूपं ध्यायेत्।**

सूक्ष्म ध्यानः

आद्यं कूटत्रयचिन्तनः
प्रथमं वाग्कूटः ब्रह्मा ऋषिः गायत्री छन्दः श्रीवाग्भवेश्वरी त्रिपुरसुन्दरि देवता कं बीजं ह्रीं शक्तिः एईल कीलकं मम महात्रिपुरसुन्दरी प्रसादसिद्ध्यर्थे वाक् सिद्ध्यै जपे विनियोगः

न्यासः कएईलह्रीं ब्रह्मवग्रूपिण्यै-कएईलह्रीं विष्णुवग्रूपिण्यै-कएईलह्रीं रुद्रवग्रूपिण्यै-कएईलह्रीं परवग्रूपिण्यै-कएईलह्रीं शिववग्रूपिण्यै-कएईलह्रीं अखिलवग्रूपिण्यै.

ध्यानः शुक्लां स्वछविलेपमाल्यवसनां शीतांशुखण्डोज्ज्वलां।
व्याख्यामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजैः।।
बिभ्राणां कमलासनां कुचनतां वाग्देवतां सुस्मितां।
वन्दे वाग्विभवप्रदां त्रिनयनां सौभाग्यसंपत्करीं।।

मूलाधारे वह्निमण्डलं मध्याह्नार्ककोटि पुञ्जसमं वाग्भवकूटं ध्यात्वा "कएईलह्रीं'' (16 वारं जपेत्)

द्वितायं कामकूटंःसम्मोहन ऋषिः गायत्री छन्दः श्रीकामेश्वरी त्रिपुरसुन्दरि देवता हं बीजं ह्रीं शक्तिः सकहल कीलकं मम महात्रिपुरसुन्दरी प्रसादसिद्ध्यर्थे वशीकरण सिद्ध्यै जपे विनियोगः

न्यासः हसकहलह्रीं द्रां संक्षोभण बाणाय- हसकहलह्रीं द्रीं सर्वविद्रावण बाणाय- हसकहलह्रीं क्लीं आकर्षण बाणाय- हसकहलह्रीं ब्लूं वशीकरण बाणाय- हसकहलह्रीं सः उन्मादन बाणाय- हसकहलह्रीं द्रां द्रीं क्लीं ब्लूं सः सर्वबाणेभ्य

ध्यानः बालार्ककोटि रुचिरां स्फटिकाक्षमालां
कोदण्डं इक्षुजनितं स्मरपञ्चबाणान्।
विद्यां च हस्त कमलैः दधतीं त्रिनेत्रां
ध्याये समस्तजननीं नवचन्द्रचूडां।।

पूर्ववाग्भवकूट नादात्मिका शिखा अनाहतचक्रं स्पृशन्ती, तत्र सूर्यमण्डलं इन्द्रगोपकोटिप्रभं
कामकूटं ध्यात्वा ''हसकहलह्रीं'' (16वारं जपेत्)

तृतीयं कामकूटः शिव ऋषिः पंक्ति छन्दः श्रीआदिशक्ति त्रिपुरसुन्दरी देवता सं बीजं ह्रीं शक्तिः कल कीलकं मम महात्रिपुरसुन्दरी प्रसादसिद्ध्यर्थे चतुर्वर्ग सिद्ध्यै जपे विनियोगः

न्यासः सकलह्रीं सर्वज्ञशक्त्यै- सकलह्रीं नित्यतृप्तशक्त्यै-सकलह्रीं अनादिबोधशक्त्यै-सकलह्रीं स्वतन्त्रशक्त्यै-सकलह्रीं नित्यमलुप्तशक्त्यै-सकलह्रीं अनन्तशक्त्यै

ध्यानं : कदम्बवनमध्यगां कनकमण्डपान्तःस्थितां
षडम्बुरुहवासिनीं अमरसिद्धसौदामिनीं।
विजृम्भितजपारुचिं विमलचन्द्रचूडामणिं
त्रयम्बक-कुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये।।

पूर्वकामकूट नादात्मिका शिखा आज्ञाचक्रं स्पृशन्ती, तत्र सोममण्डलं कोटिचन्द्रप्रतीकाशं
शक्तिकूटं ध्यात्वा ''सकलह्रीं'' (16वारं जपेत्)

अभेद ध्यानः
मूलादि ब्रह्मरन्ध्रान्तं ब्रह्मविद्यां भावये।
प्रभापटलव्याप्तं स्वशरीरं चिन्तये।।
अहं देवि न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक्।
सच्चिदानन्दरूपोहं नित्यमुक्तस्वभाववान्।।
त्वामेवाहं अहंत्वं च संविन्मात्रवपुस्तव।
आवयोरन्तरं देवि नश्यत्वाज्ञाबलात्।।
अहं तीर्णो भवं घोरं कृत्यं किञ्चिन्नमेऽस्थ वै।
तथापि देहि मे मातः आज्ञां तव सुसेवने।।
कृत्वा समाधि स्थितया धिया ते चिन्तनं नवाधार निवासभूतं।
प्रातः समुत्थाय तवप्रीत्यर्थं संसार यात्रां अन्वर्थयिष्ये।।
संसारयात्रामनु **वर्तमानं** त्वदाज्ञाया श्रीत्रिपुरे परेशि।
स्पर्धा-तिरस्कार-कलि-प्रमाद**भयानि** मां मा-सन्तु मातः।।

जानामि धर्मं न च मे प्रवृत्ति जानाम्यधर्मं न च मे निवृत्तिः।
त्वया हृदन्तः स्थितया महेशी यथा नियुक्तोऽस्मि तथा करोमि।।

मञ्जुशिञ्जितमञ्जीरं वामार्धं महेशितुः।
आश्रयामि जगन्मूलं यन्मूलं वचसामपि।।

पूर्वशक्तिकूट नादात्मिका शिखा ब्रह्मरन्ध्रस्थ इन्दुमण्डलं स्पृशन्ति

एवं मूलविद्यायाः खण्डत्रयं पदार्थैक्येन विचिन्त्य मूलाधारादि ब्रह्मरन्ध्रान्तं व्याप्त तेजोदण्डस्वरूपमखण्ड मूलविद्यां विचिन्त्य मूलाधारादि ब्रह्मरन्ध्रान्त तेजसा व्याप्तमरुणं विश्वं स्वशरीरं च विभाव्य
''कएईलह्रीं हसकहलह्रीं सकलह्रीं'' (16वारं जपेत्)
द्वितीयं कुण्डलिनी चिन्तनः

मूलाधारः गुदोर्ध्वभागे मूलाधाराख्य चतुर्दलपद्मं तत्कर्णिकायां सूर्यसोमाग्निरूप अ क थादि त्रिरेख त्रिकोणं तन्मध्ये कामबीजान्ते बिन्दुतुल्योगतः कुलकुण्डं तन्मध्ये प्रवेशितमुखी बिसतन्तु तनीयसी प्रसुप्तभुजगीमिव शङ्खवत् सार्ध-त्रिवलयाकारा

विद्युल्लतोपमा विश्व-सृष्ट्यादिविधायिनि स्वयम्भू लिङ्गवेष्टिनि बिन्दु-नाद
शिवशक्तिस्वरूपिणी श्रीमहात्रिपुरसुन्दरी-रूपान्तरभूता कुलकुण्डलिनी
-तत्रैवपद्मे भूततत्त्वाधिष्ठात्री फ्रें मातृकाख्या देवता शिवशक्तिभेदेन द्विगुणित-
अष्टविंशति-तत्वात्मकाभिः प्रधान देवतांश रश्मिभूताभिः त्रिपुरसुन्दरि त्रिपुरसुन्दरादि
चर्यानाथमयि-चर्यानाथमयान्त आवरणदेवताभिःआवृत हसक्षमलवरयूं
नवात्मेश्वरानन्दनाथ नवात्मेश्वरी पराम्बा
-तत्रैव पद्मे अस्थिगता-धूम्रवर्णा पञ्चवदना-वरदादि-आवृता साकिनी
-तत्रैव पद्मे कुङ्कुमवर्णो वल्लभाशक्तियुक्तो गणेशं ध्यायेत्

स्वाधिष्ठानं: तदूर्ध्वं लिङ्गस्थाने स्वाधिष्ठानाख्य षड्दलं तत्कर्णिकायां
जलतत्त्वाधिष्ठात्री ह्रीं कुण्डल्याख्या देवता शिवशक्तिभेदेन द्विगुणित षड्विंशति
तत्वात्मकाभिः प्रधान देवतांश रश्मिभूताभिः लोपामुद्रामयी लोपामुद्रामयादि माहेश्वरी
माहेश्वरान्त आवरण देवताभिः आवृत-ह्स्ल्ब्लूं द्वीपेश्वरानन्दनाथ द्वीपेश्वरी पराम्बा
-तत्रैवपद्मे मेदोगता पीतवर्णा चतुर्वदना बन्धिन्यादि आवृता काकिनी
-तत्रैवपद्मे सिन्दूरवर्णो सरस्वतीयुक्तो ब्रह्माणं ध्यायेत्

मणिपूरकं: तदूर्ध्वं नाभिस्थाने मणिपूरकाख्य दशदलं तत्कर्णिकायां
अग्नितत्त्वाधिष्ठात्री श्रीं क्रियाख्या देवता शिवशक्तिभेदेन द्विगुणित एकत्रिंशत्
तत्वात्मकाभिः प्रधान देवतांश रश्मिभूताभिः कौमारी कौमारादि बीजाकर्षिणी
बीजाकर्षणान्त आवरण देवताभिः आवृता क्ष्रौं संवर्तेश्वरानन्दनाथ संवर्तेश्वरी पराम्बा
-तत्रैवपद्मे मांसगता रक्तवर्णा त्रिवदना डामर्यादि आवृता लाकिनी
-तत्रैवपद्मे नीलवर्णो महालक्ष्मीयुक्तो विष्णुं ध्यायेत्

अनाहतं: तदूर्ध्वं हृदयस्थाने अनाहताख्य द्वादशदलं तत्कर्णिकायां
वायुतत्त्वाधिष्ठात्री ऐं ज्ञानाख्या देवता शिवशक्तिभेदेन द्विगुणित सप्तविंशति
तत्वात्मकाभिः प्रधान देवतांश रश्मिभूताभिः आत्माकर्षिणी आत्माकर्षणादि
सर्वसंपत्तिपूरणी सर्वसंपत्तिपूरणान्त आवरण देवताभिः आवृता ह्सख्क्रें
हंसेश्वरानन्दनाथ हंसेश्वरी पराम्बा
-तत्रैवपद्मे रक्तनिष्ठा श्यामाभा द्विवदना काळरात्र्यादि आवृता राकिनी
-तत्रैवपद्मे हेमवर्णो पार्वतीयुक्तो शिवं ध्यायेत्

विशुद्धिः तदूर्ध्वं कण्ठस्थाने विशुद्धाख्य षोडशदलं तत्कर्णिकायां
नभोतत्त्वाधिष्ठात्री ह्रूं इच्छाख्या देवता शिवशक्तिभेदेन द्विगुणित षड्त्रिंशत्
तत्वात्मकाभिः प्रधान देवतांश रश्मिभूताभिः सर्वमन्त्रमयी सर्वमन्त्रमयादि कौलिनी
कौलान्त आवरण देवताभिः आवृता फ्रें विच्चेश्वरानन्दनाथ विच्चेश्वरी पराम्बा
-तत्रैवपद्मे त्वग्गता आरक्तवर्णा वदनैकयुता अमृतादि आवृता डाकिनी
-तत्रैवपद्मे शुद्धस्फटिकसंकाशो प्राणाशक्तियुक्तो जीवं ध्यायेत्

आज्ञाः तदूर्ध्वं भ्रूमध्यस्थाने आज्ञाख्य द्विदलं तत्कर्णिकायां
मनोतत्त्वाधिष्ठात्री ऐं पराख्या देवता शिवशक्तिभेदेन द्विगुणित द्वात्रिंशत्
तत्वात्मकाभिः प्रधान देवतांश रश्मिभूताभिः सर्वरोगहरचक्रस्वामिनी
सर्वरोगहरचक्रस्वाम्यादि महामहाशया महामहाशयान्त आवरणदेवताभिः आवृता ऐं
परेश्वरानन्दनाथ परेशी पराम्बा
-तत्रैवपद्मे मज्जागता शुक्लवर्णा षड्वना हंसवत्यादि आवृता हाकिनी
-तत्रैवपद्मे विद्युत्वर्णो पराशक्तियुक्तो परमात्मां ध्यायेत्

सहस्रारंः तदूर्ध्वं सहस्रार दलपद्मं अधोमुखं योगबलेन ऊर्ध्वमुखं कृत्वा(चिन्तयेत् वा)
तत्रैवपद्मे शुक्लगता सर्ववर्णोपशोभिता सर्वतोमुखी अमृतादिसर्वदेवता आवृता
याकिनी
-तत्कर्णिकायां चन्द्रमण्डलं तत्र अकारादि षोडशस्वरैः सबिन्दुकैः पूर्वरेखा ककारादि तकारान्तैःसबिन्दुकैः अधोलिखितैः दक्षिणरेखा थकारादि सकारान्तैःसबिन्दुकैः ऊर्ध्वोर्ध्वं लिखितैः उदग्रेखा तदन्तर्भागे ईशानकोणे हकार सबिन्दुकःआग्नेयकोणे ळकार सबिन्दुकःपश्चिमकोणे क्षकार सबिन्दुकः तन्मध्ये वामे श्रीचक्रमहानगरसम्राज्ञी रक्तपादं श्रीचक्रमहानगरसम्राट् शुक्लपादं युक्तं रक्तमाल्याम्बरधरां सर्वाभरणभूषितां श्री अमुकाम्बां तामधीन वामाङ्कं पूर्णचन्द्रप्रभं श्वेत माल्याभरणधरं मुक्तादाम विभूषाढ्यं वराभयकरं प्रसन्न वदनं शान्तं सर्वदेवतास्वरूपिणं श्रीअमुकानन्दनाथ श्रीगुरुं ध्यायेत्

मूलाधारादि ब्रह्मरन्ध्रान्तं सकल कमल कर्णिकामध्यदेशं निर्भिद्य सुषूम्नाख्य नाडी धमनीरिव सरन्ध्रगर्भा सूक्ष्मतमा प्रवृत्ता तद्वामदक्षिणयोः इडापिङ्गला नाडी।

एतत्सर्वं विचिन्त्य कुलकुण्डलिनीं ''हुं स्वाहा'' (हंसः स्वाहा । ॐ स्वाहा) सचेतसां

विधाय स्वेच्छादण्डाहतां कृत्वोत्थाय कुलपथेन चक्रषट्कं भिन्दतीं ब्रह्मरन्ध्रं नीत्वा तेजोमयेन सच्चिदानन्दलक्षणेन परमशिवेनैक्यमापद्य तयोः सामरस्येन आनन्दमयेन आत्मानं विचिन्त्य परब्रह्मामृतं तां पाययित्वा तत्पानेन मत्तीभूतां तेनैवामृतेन द्विदळचक्रद्वारा विगळितेन डाकिन्यादि मण्डलानि आप्लावयन्ती पुनः षट् चक्र भेदन मार्गेणैव परावर्त्य कुलकूण्डे यथापूर्वं अवस्थापयेत्।

<u>एतत् कुण्डलिनी ध्यानं उपासनायां नित्यमङ्गं।</u>

<u>पराध्यानंः</u> मञ्चपादस्थ ब्रह्मा - पृथ्वी , विष्णु - जल, रुद्र - अग्नि, महेश- वायु, मञ्चफलकाकार सदाशिव - आकाश तत्त्वं । चतुर्बाहुस्थायुधानां तत्त्वं : रागस्वरूपं तीव्र-आत्मज्ञानेच्छा तत्त्वं काषायरूप -विघ्नहरं पाश; क्रोधाकारं अनात्म-नामरूपद्वेषतत्त्वं लयरूप -विघ्नहरं अङ्कुशं; शुद्धमनस्वरूपं अन्तर्मुख तत्त्वं विक्षेपरूप-विघ्नहरं इक्षुकोदण्डं; शब्द-स्पर्श-रूप-रस-गन्धाख्य-पञ्चतन्मात्रास्वरूपं जितेन्द्रियतत्त्वं रसास्वादरूप-विघ्नहरं पञ्चपुष्पबाणं।

सत्व चित्व आनन्दत्व रूप धर्मत्रय विनिर्मुक्त स्वयं-ज्योति-स्वरूप उपाधिरहितं शुद्धसंविद् स्वरूपं महाकामेशभट्टारकं तस्याङ्कस्थां सच्चिदानन्दधर्मात्मक सदानन्दपूर्ण सर्व साक्षि चिद्रूप सादाख्यकलां ीललितामहात्रिपुरसुन्दरीपराभट्टारिका निजस्वरूपं।

निरुपाधिक चैतन्यमेव सच्चिदानन्दात्मकं अन्तः करणप्रतिबिम्बितं सत् तद् अहमेव विभावनं श्री ललितायाः लौहित्यं। अभेद संबन्धेन सत्व चित्व आनन्दत्व विषिष्ट संविदः केवल संविदः च तादात्म्यं श्रीकामेश्वराङ्कारूढं।

उपाध्यभावरूप शुक्लत्व उपलक्षित शुद्धसंविदात्म शुक्ल चरणं।
चित्व विशिष्ट संवित् प्राथमिक पराहन्ता वृत्तिरूप रागेण उपलक्षित रक्त चरणं।
श्रीललितामहात्रिपुरसुन्दरीं परमशिवशङ्कराभिन्नां सच्चिदानन्दात्मक ब्रह्मरूपां स्वाभेदेन ब्रह्मैवाहमिति भावयेत्।

अन्तःकरणवछिन्नस्य स्वस्य सत्यज्ञानानन्तत्वादि धर्म विशिष्टस्य ब्रह्मणा विशेष अन्तःकरणस्य सत्यत्वादि धर्मबृन्दस्य च लयं विभाव्य, अवशिष्ट धर्मि मात्रस्य अभेदेन महावाक्यार्थरीत्या चिन्तयेत्। एषा-अद्वैतभावना पराध्यानं।

4. रश्मि माला स्तोत्रं

असंख्यात महः पुञ्जपिञ्जरीकृत विग्रहं।
रश्मिमालां अहं वन्दे महात्रिपुरसुन्दरीं।।

अक्षस्रक्कुण्डिकाहस्तां शुद्धस्फटिकसन्निभां।
सर्वविद्यामयीं वन्दे गायत्रीं वेद मातरं ।।

आरूढ ऐरावतं श्यामं सहस्र नयनोज्ज्वलं।
स्फुरत् वज्रप्रहरणं नौमीन्द्रं अभयङ्करं।।

रक्ताम्बरं रक्तभूषं रक्तं रक्ताब्ज निष्फुरं ।
वामाशक्ति समाश्लिष्टं घृणिसूर्यमहं भजे ।।

ओंकार वाच्यं उच्चाण्ड चण्डांशु सदृशप्रभं।
वासुदेवाभिदं ब्रह्मं विश्वगर्भमुपाश्रये ।।

देवीं तुरीय गायत्रीं तुरीयातीत पदाश्रयां ।
परोरजः प्रकाशात्मा चितिरूपमहमाश्रये।।

चक्षुस्तेजोमयं पुष्प कन्दुकं बिभ्रतीं करैः।
रौप्य सिंहासनारूढां देवीं चक्षुष्मतीं भजे।।

धृत कल्हार मालाभिः कन्याभिः परिवारितं।
स्थितमिक्षुरथे विश्वावसुं गन्धर्वमाश्रये ।।

आत्त सज्ज धनुर्बाण टङ्क-एणं वृषभस्थितं।
अन्नपूर्णा समाश्लिष्टं पथिषद्रुद्रमाश्रये ।।

नौका सिम्हसनारूढां(शाक्य)शाक्तदर्शनदेवतां।
जलापच्छमनीं वन्दे तारां वारिधिमेचकां ।।

समस्त दुरित व्याधि संघ ध्वंस पटीयसे ।
अच्युतानन्त गोविन्द नाम्ने धाम्ने नमो नमः।।

सिन्दूराभं लक्ष्म्यालिङ्गं विकटं कुञ्जराननं।
महागणपतिं देवं भक्त विघ्नघ्नमाश्रये।।

चन्द्राभः चन्द्रमुकुट: कुठारमृग धारकः ।
वराभय धरः शंभु पञ्चाक्षरमयो वपुः ।।

ऊर्ध्वाधोमुखपद्मान्तस्थितं मृत्युञ्जयेश्वरं।
वन्दे मृत्योः प्रहर्तारं चन्द्रकोटि सुशीतलं ।।

चतुराननं अम्भोजनिषण्णं भारती सखं ।
अक्षमालावराभीति कमण्डलुधरं नुमः ।।

पञ्चाशत मातृकार्णैः आरब्धाखिलदेहया।
समस्त विद्यारूपिणीं ध्यायेऽहं मातृकाम्बिकां।।

श्रीदेवी भूषितोत्साङ्गं सान्द्र सिन्दूररोचिषं।
हकारदि मनोर्वाच्यं वन्दे कामेश्वरं हरं ।।

अनेक कोटि मातङ्ग-तुरङ्ग-रथ-पङ्क्तिभि: ।
सेवितां अरुणाकारां वन्दे संपत्सरस्वतीं।।

सृष्टि स्थितिभ्यां संहृत्याऽनाख्या भासयाश्रितां।
शूल कन्था कपालाढ्यां चण्डयोगीश्वरीं नुमः ।।

पूर्णाहन्तास्वरूपाय तस्मै परमशम्भवे।
आनन्द ताण्डवोद्दण्ड पण्डिताय नमो नमः ।।

अकलंक शशांकाभा त्र्यक्षा चन्द्रकलावती।
मुद्रा पुस्त लसद्बाहुः पातुमां परमा कला ।।

पाशांकुशाक्षवलया विद्या पुस्तक धारिणीं।
नववर्षा भजे बालां दाडिमी कुसुम प्रभां।।

दारिद्र्य शैलदम्भोलि क्षीरान्नपूर्णदर्विका।
अन्नपूर्णा परानन्दकरिणी पातु नः सदा।।

बद्ध्वा पाशेनांकुशेन कृष्यमाणा स्वसाध्यकं।
घ्नन्तिं वेत्रेण वल्कासृक्पाणिं अश्वासनां भजे।।

तेजोमयमहाविद्यां शेखराञ्चितमस्तकां।
रक्तां चतुर्भुजां वन्दे श्रीविद्या गुरु पादुकां ।।

पुण्ड्रेक्षुकोदण्डां पुष्पेषु संसृणीगुणं।
रक्तां कामेश्वरांकस्थां वन्दे परदेवतां।।

श्यामलानीलवसनां शङ्खकुण्डलधारिणीं।
ध्यायाम्यभीष्ट मातङ्गी वश्याकर्षण कारिणीं ।।

पुर्णेन्दु मण्डल छाया वाचा सिद्धि प्रदायिनी।
साक्षमाला सपुस्तका वाग्वादिन्यस्तु मे हृदि ।।

नकुली वज्रदन्ताली साध्य जिह्वाहि दंशिनि।
भक्त वक्तृत्व जननी भावनीया सरस्वती।।

वन्दे गुर्वङ्घ्रि मकुटां श्यामलां शुक पाणिनीं।

समस्त सिद्धिजननीं श्यामला-गुरुपादुकाम्।।

शुक वीणा लसत्पाणिं शुद्ध- विद्यामहीमयीं।
श्यामां नीपवनान्तस्थां वन्दे संगीतयोगिनीं।।

महार्णवे निपतितं उद्धरन्तीं वसुन्धरां।
महादंष्ट्रां महाकायां नमाम्युन्मत्त भैरवीं ।।

स्वप्ने शुभाशुभं भावि वदन्तीं भक्तकार्ययोः।
दुःस्वप्नहारिणीं वन्दे वराहीं स्वप्न-नायिकां ।।

मुक्तकेशीं विवासनां सर्वाभरणभूषितां।
स्वयोनि दर्शनोन्मुहृयत्पशुवर्गां नमाम्यहं ।।

देशिकाङ्घ्रिलसन्मौलिं खड्गिनीं च कपालिनीं ।
भावयामि घनच्छायां पञ्चमी-गुरुपादुकां ।।

हलं कपालं मुसलं वरं पाणिषु बिभ्रतीं ।
कलये कोलवदनां नील-वारिधरप्रभां

सर्वविद्यामयीं सर्वशक्तिपीठस्वरूपिणीं।
श्रीपूर्तिदेवतां वन्दे श्रीकरीं मुक्तिदायिनीं ।।

कन्दरे-हृदये-फाले देशिकाङ्घ्रि-युग-त्रयं।
दधतीं दीप्तभूषाढ्यां श्रीमहापादुकां नुमः।।

इरा त्रिपुरभैरव्या सह संहारभैरवः।
रक्ताभिधान योगिन्याः सारसश्चापि पञ्चमः ।।
चामुण्डेति स्वस्व मन्त्र पद वाक्याः परोन्मुधा ।
विद्यासिद्धिकरी वन्दे ललिला-विघ्नदेवता।।

हसन्ति हसितालापा मातङ्गी परिचारिका ।
वेत्रहस्ता हृदि ध्येया श्यामला-विघ्न देवता।।
स्तम्भिनि पञ्चमीमन्त्र विघ्नस्तम्भनकारिणी।
चिन्तनीया सदाचित्ते तद्विद्या सिद्धिदायिनि ।।

कलार्णमन्त्र वाच्यानि विघ्नघ्नानि मनीषिणौ।
नुमस्सर्वाणि भूतानि सर्व दोष निवृत्तये ।।
महा पद्माटवी वासैरमीभिर्देवतागणैः ।
सेवितामितां वन्दे ललितां परमेश्वरीं ।।

या रश्मिमाला स्तुतिमित्युदग्रां तल्पात्समुद्धृत्य जपेत्प्रभाते।
सर्वस्यसिद्धि स्पृहनीयमूर्ति विपत्ति मुक्तौ विजयी च जीयात् ।।

इति रश्मिमाला स्तोत्रं संपूर्ण



5. मन्दिर पूजा

4-अं द्वादशान्त मध्ये रक्तशुक्लात्मक गुरुचक्रेश्वराय नमः

4-आं मूलाधारकमलमध्ये अष्टोत्तर शतधास्थित मणिसन्निभ कमले सिद्धलक्ष्मी देव्यायुक्ताय श्रीगणेशनाथाय नमः

4-इं हृत्सरोजमध्ये चक्षुष्मत्या छाया देव्यायुक्ताय सहस्रकिरणाय नमः

4-ईं **अनेक कोटि बहिः सहस्रकोटियोजनविस्तीर्ण** अखण्डाकारवृत्यात्मक अमृताम्भोनिधौ त्रिपुरागायत्र्यम्बा देव्यै नमः

4-उं स्थूलदेहात्मकनवरत्नद्वीपे **कालायसप्राकारचतुर्द्वारपालकाय** रक्तद्वादशशक्तियुक्ताय द्वीपनाथाय जीवात्मने नमः

4-ऊं लिङ्गदेहात्मक **कालायस कांस्य प्राकारान्तरालगत** नानावृक्षमहोध्यानमध्ये श्रीमहाकाल्यम्बा देव्युक्ताय श्रीमहाकालनाथाय नमः

4-ऋं **कांस्य ताम्र प्राकारान्तरालगत** सङ्कल्पविकल्परूप तैजसात्मक कल्पवाटिकामध्ये मधुश्रीमाधवश्री सहित मधुररसात्मने वसन्त-ऋतुनाथाय नमः

4-ॠं **ताम्र सीस प्राकारान्तरालगत** शब्दतन्मात्रत्मक सन्तानवाटिकामध्ये शुक्रश्रीशुचिश्री सहित आम्लरसात्मने ग्रीष्म-ऋतुनाथाय नमः

4-लृं **सीस पित्तल प्राकारान्तरालगत** स्पर्शतन्मात्रत्मक हरिचन्दनवाटिकामध्ये नभश्रीनभस्यश्री सहित तिक्तरसात्मनेवर्ष-ऋतुनाथाय नमः

4-लॄं **पित्तल पञ्चलोह प्राकारान्तरालगत** रुपतन्मात्रत्मक मन्दारवाटिकामध्ये इषश्री ऊर्जश्री सहित कटुरसात्मने शरदृतुनाथाय नमः

4-एं **पञ्चलोह रूप्य प्राकारान्तरालगत** रसतन्मात्रत्मक पारिजातवाटिकामध्ये

सहश्रीसहस्यश्रीसहित कषायरसात्मने हेमन्त-ऋतुनाथाय नमः

4-ऐं **रूप्य स्वर्णप्राकारान्तरालगत** गन्धतन्मात्रत्मक कदम्बवाटिकामध्ये

श्रीश्यामलाम्बादेव्यै नमः

4-ओं **रूप्य स्वर्णप्राकारान्तरालगत** गन्धतन्मात्रत्मक कदम्बवाटिकामध्ये

तपश्रीतपस्यश्री सहित लवणरसात्मनेशिशिर- तुनाथाय नमः

4-औं **स्वर्णपुष्परागरत्नप्राकारान्तरालगत** मांसधात्वात्मक पुष्परागरत्नतरुवाटिकामध्ये

सिद्धगणावृत श्रीचण्डिकायुक्ताय मृत्युञ्जयनाथाय नमः

4-अं पुष्परागरत्न-पद्मरागरत्न**प्राकारान्तरालगत** ओजोधात्वात्मक पद्मरागरत्नतरु

वाटिकामध्ये चारणगणावृत मातृकाम्बादेव्यै नमः

4-अः पद्मरागरत्न-गोमेधकरत्न**प्राकारान्तरालगत** मेधोधात्वात्मक गोमेधकरत्नतरु

वाटिकामध्ये योगिनीभैरवगणावृत कालसंकर्षिण्यम्बादेव्यै नमः

4-कं गोमेधकरत्न-वज्ररत्न **प्राकारान्तरालगत** अस्थिधात्वात्मक वज्ररत्नतरु

वाटिकामध्ये अप्सरोगणावृत गन्धर्वपतये विश्वासुनाथाय नमः

4-खं वज्ररत्न-कनक-वैडूर्यरत्न **प्राकारान्तरालगत** त्वग्धात्वात्मक वैडूर्यरत्नतरुवाटिकामध्ये

दैत्यनाग गणावृत महाशेषनाथाय नमः

4-गं वैडूर्यरत्न-हरिन्मणिरत्न **प्राकारान्तरालगत** रोमधात्वात्मक हरिन्मणिरत्नतरु

वाटिकामध्ये मनुगणावृत वेदमत्रे गायत्र्यम्बादेव्यै नमः

4-घं हरिन्मणिरत्न-मुक्तारत्न **प्राकारान्तरालगत** शुक्लधात्वात्मक मुक्तारत्नतरुवाटिकायाः

पूर्वभागे सुरपति-ऐरावतवाहन-वज्रहस्त- अप्सरोगणावृत शचियुक्ताय देवेन्द्रनाथाय नमः

4-ङं हरिन्मणिरत्न-मुक्तारत्न **प्राकारान्तरालगत** शुक्लधात्वात्मक मुक्तारत्नतरुवाटिकायाः आग्नेयभागे तेजोधिपति-अजवाहन-शक्तिहस्त-स्वाहास्वधायुक्ताय वैश्वानरनाथाय नमः

4-चं हरिन्मणिरत्न-मुक्तारत्न **प्राकारान्तरालगत** शुक्लधात्वात्मक मुक्तारत्नतरुवाटिकायाः दक्षिणभागे प्रेताधिपति-महिषवाहन-दण्डहस्त श्यामलायुक्ताय वैवस्वतनाथाय नमः

4-छं हरिन्मणिरत्न-मुक्तारत्न **प्राकारान्तरालगत** शुक्लधात्वात्मक मुक्तारत्नतरुवाटिकायाः निऋतिभागे रक्षोधिपति-प्रेतवाहन-ख़ड्गहस्त-कालीयुक्ताय निऋतिनाथाय नमः

4-जं हरिन्मणिरत्न-मुक्तारत्न **प्राकारान्तरालगत** शुक्लधात्वात्मक मुक्तारत्नतरुवाटिकायाः पश्चिमभागे जलाधिपति-मकरवाहन-पाशहस्त- पद्मिनीयुक्ताय वरुणनाथाय नमः

4-झं हरिन्मणिरत्न-मुक्तारत्न **प्राकारान्तरालगत** शुक्लधात्वात्मक मुक्तारत्नतरुवाटिकायाः वायव्य भागे प्राणाधिपति-रुरुवाहन-ध्वजहस्त-मोहिनीक्ताय समीरनाथाय नमः

4-ञं हरिन्मणिरत्न-मुक्तारत्न **प्राकारान्तरालगत** शुक्लधात्वात्मक मुक्तारत्नतरुवाटिकायाः उत्तर भागे निधिपति-नरवाहन-मणिहस्त-चित्रिणीयुक्ताय कुबेरनाथाय नमः

4-टं हरिन्मणिरत्न-मुक्तारत्न **प्राकारान्तरालगत** शुक्लधात्वात्मक मुक्तारत्नतरुवाटिकायाः ईशान भागे विद्याधिपति-ऋषभवाहन-त्रिशूलहस्त-शतकोटि-रुद्रगणावृत गिरिजायुक्ताय ईशाननाथाय नमः

4-ठं मुक्ता-मरकतरत्न **प्राकारान्तरालगत** मज्जाधात्वात्मक मरकतरत्नतरुवाटिकामध्ये हेमतलभवने श्रीवार्ताल्यम्बा देव्यै नमः

4-डं मरकत-विद्रुमरत्न **प्राकारान्तरालगत** रुधिरधात्वात्मक विद्रुमरत्नवन वाटिकामध्ये भारतीयुक्ताय ब्रह्मनाथाय नमः

4-ढं विद्रुम-माणिक्यरत्न **प्राकारान्तरालगत** अनाहत तत्वात्मक माणिक्यमण्डपे लक्ष्मीयुक्ताय महाविष्णुनाथाय नमः

4-णं माणिक्य- नानारत्नमय **प्राकारान्तरालगत** ब्रह्मरन्ध्रात्मक नानारत्न सहस्र स्तम्भ मण्डपमध्ये पार्वतीयुक्ताय महाशम्भुनाथाय नमः

4-तं नानारत्न-मनोमय**प्राकारान्तरालगत** द्वादशान्ते सहजस्थित्यात्मक अमृतवापिकायां स्थितनााि-**निषण्णायै पतिसहितायै** ताराम्बादेव्यै नमः

4-थं मनो **बुद्धि**मय**प्राकारान्तरालगत** लतामध्ये सविकल्पस्थित्यात्मक आनन्दवापिकायां स्थितनााि-**निषण्णायै पतिसहितायै** वारुण्यम्बादेव्यै नमः

4-दं **बुद्ध्यहंकार**मय**प्राकारान्तरालगत** भ्रूमध्ये निधिध्यासनस्थित्यात्मक विमर्शवापिकायां स्थितनााि-**निषण्णायै पतिसहितायै** कुरुकुल्लाम्बादेव्यै नमः

4-धं **अहंकार सूर्यप्राकारान्तरालगत** प्रवृत्तिस्वरुप बालातपोद्गारमध्ये-ग्रहगणावृत-प्रकाशशक्तियुक्ताय मार्ताण्डभैरवनाथाय नमः

4-नं **सूर्य चन्द्रप्राकारान्तरालगत** निवृत्तिस्वरुप चन्द्रिकोद्गारमध्ये-तारागणावृत-रोहिणीयुक्ताय सोमनाथाय नमः

4-पं **चन्द्र शृङ्गारप्राकारान्तरालगत** अमनस्कस्थित्यात्मक महाशृङ्गारपरिघामध्य-रतीयुक्ताय मन्मथनाथाय नमः

4-फं **शृङ्गार** चिन्तामणिगृराज**प्राकारान्तरालगत** शुद्धसत्वप्रधानान्तःकरणात्मक **त्रिलक्षयोजनाविस्तीर्ण** महापद्माटवीमध्ये श्रीमदन्नपूर्णाम्बादेव्यै नमः

4-बं शुद्धसत्वप्रधानान्तःकरणात्मक सहस्र**योजनाविस्तीर्ण**-चिन्तामणिगृहराजास्य ऋग्वेदात्मक-पूर्वद्वार-मध्ये दुर्गाभट्टारिकाम्बा देव्यै नमः

4-भं शुद्धसत्वप्रधानान्तःकरणात्मक सहस्र**योजनाविस्तीर्ण**-चिन्तामणि गृहराजास्य यजुर्वेदात्मक दक्षिणद्वार मध्ये वाग्वादिन्यम्बा देव्यै नमः

4-मं शुद्धसत्वप्रधानान्तःकरणात्मक सहस्र**योजनाविस्तीर्ण**-चिन्तामणिगृहराजास्य सामवेदात्मक पश्चिमद्वार मध्ये त्रैपुरसिद्धान्तसमयदेवतायै नमः

4-यं शुद्धसत्वप्रधानान्तःकरणात्मक सहस्र**योजनाविस्तीर्ण**-चिन्तामणि गृहराजास्य अथर्ववेदात्मक उत्तरद्वारमध्ये संपत्करी भट्टारिकाम्बादेव्यै नमः

4-रं शुद्धसत्वप्रधानान्तःकरणात्मक चिन्तामणिगृहराजास्य अमृतमय पूर्वद्वारस्योत्तरस्थवेदिकायां पराशक्तेः बुद्धिरूपिण्यै श्रीमातङ्गीश्वरीदेव्यै नमः

4-लं शुद्धसत्वप्रधानान्तःकरणात्मक चिन्तामणिगृहराजास्यामृतमय पूर्वद्वारस्य दक्षिणस्थमणिवेदिकायां पराशक्तेः अहङ्कारत्मक श्रीमहावारह्यम्बादेव्यै नमः

4- वं शुद्धसत्वप्रधानान्तःकरणात्मक चिन्तामणि गृहराजास्य पूर्वद्वारे अमृतेश्वर्यम्बादेव्यै नमः

4- शं शुद्धसत्वप्रधानान्तःकरणात्मक-चिन्तामणिगृहराजान्तरे **शक्तिरक्षाकराय सततदशवर्षाय** निरुपाधिकसंविदात्मने कुमारकामेश्वराय नमः

4- सं शुद्धसत्वप्रधानान्तःकरणात्मक चिन्तामणि गृहराजान्तरे पञ्चब्रह्ममय महामञ्चफलके सदानन्दपूर्णात्मने श्रीललिता दुहित्रे बालाम्बिका देव्यै नमः

4- हं शुद्धसत्वप्रधानान्तःकरणात्मक-चिन्तामणि गृहराजास्य ऊर्ध्वभागे सकल कल्पना रहिताय परशम्भुनाथाय नमः

4-षं शुद्धसत्वप्रधानान्तःकरणात्मक-चिन्तामणिगृहराजास्य निधिध्यासन तूलिकापीठे

अभितश्चक्रराजरक्षाकरो पूर्णनाथसहितायै श्रीपूर्त्यम्बादेव्यै नमः

4-ळं दिव्यदेहात्मक श्रीचक्रराज-महारथशृङ्गे सच्चिदानन्द धर्मात्मक श्री ब्रह्म-विष्णु-शिवयुक्तायै सप्ताननाभट्टारिकाम्बा देव्यै नमः

4- क्षं दिव्यदेहात्मक श्री चक्रराज महारथमध्ये पृथ्वी सलिल वह्नि वाय्वाकाश गन्ध रस रूप स्पर्शशब्द उपस्थपायुपादपाणिवाक् घ्राणजिह्वाचक्षुःत्वक् श्रोत्र मनः बुद्धि-अहंकार प्रकृति पुरुष नियति काल राग अविद्या कला माया शुद्धविद्या ईश्वर सदाशिव शक्ति शिवात्मक षट्त्रिंश्तत्व सोपानोपरि परापरपरमाद्वैतबिन्दौ योगपीठे

गुरूपाधष्टीमन्त्रार्थानुसन्धानवृत्तिरूप मणिमयमहासिंहासनाय नमः

4- श्वेतमुक्तालङ्कारमहाछत्रधारिण्यै वां वामायै नमः

4- श्रीं ऐश्वर्यसिद्धिं गङ्गातरङ्गधवलमहाचामरधारिण्यै ज्यें ज्येष्ठायै महालक्ष्म्यै नमः

4- महाकालाञ्चिकाधारिणि हं हसन्त्यम्बा सहित कर्पूरवीटिकाधारिण्यै रौं रौद्र्यै नमः

4- पुष्पमालाधारिण्यै अं अम्बिकायै नमः

4- भूषणाढ्यपेटीधारिणि इं इच्छा-सहित महोदयमहामांगल्य-धारिण्यै रं रत्यै नमः

4- व्यजनकधारिण्यै ज्ञां ज्ञानायै नमः

4- सकल जगन्मोहन महामकरध्वजधारिण्यै अं अश्वारूढायै नमः

4- व्यजनकधारिण्यै क्रिं क्रियायै नमः

4- गन्धचषकधारिण्यै कुं कुब्जिकायै नमः

4- वज्रमय काङ्कतीधारिण्यै बिं बिम्ब्यै नमः

4- कज्जलोज्ज्वलशलाकाधारिण्यै विं विषघ्न्यै नमः

4- कर्पूराढ्यकरण्डधारिण्यै दूं दूतर्यै नमः

4- तत्त्वज्ञानदर्पणधारिण्यै सं संपत्कर्यै नमः

4- ऐं वाक्सिद्धिं गङ्गातरङ्गधवल महाचामरधारिण्यै सं सर्वानन्दायै वागीश्वर्यै नमः

4-लां ह्लां ब्रह्मणे पृथिव्याधिपतये रक्तवर्णाय चतुर्वक्त्राय दण्ड-कमण्डल-कुण्डिका-पद्म-धराय सृष्टिकर्त्रे वामाशक्त्याश्रिताय नमो ब्रह्ममयैकमञ्चपादाय नमः

4-वां ह्वीं विष्णवे अपामधिपतये श्यामवर्णाय शंख-चक्र-गदा-पद्म धराय स्थितिकर्त्रे ज्येष्ठाशक्त्याश्रिताय नमो विष्णुमयैकमञ्चपादाय नमः

4-रां ह्रूं रुद्राय तेजो अधिपतये पञ्चवक्त्राय शुद्धस्फटिकनिभाय शूल-वज्र-खड्ग-परशु-अभय-नाग-पाश-घण्टा-प्रलयाग्नि-अंकुश-धराय संहारकर्त्रे रौद्रीशक्त्याश्रिताय नमो रुद्रमयैकमञ्चपादाय नमः

4-यां ह्यौं ईश्वराय वायव्याधिपतये गौरवर्णाय मृग-टंक-वराभीति-धराय तिरोधानकर्त्रे अम्बिका शक्त्याश्रिताय नमो ईश्वरमयैकमञ्चपादाय नमः

4-ह्सौं सदाशिवाय वियदाधिपतये पञ्चवक्त्राय सिन्दूरवर्णाय पञ्चविंशतिकराय अनुग्रहकर्त्रे शान्ताशक्त्याश्रिताय नमो सदाशिवप्रेतपद्मासनाय महामञ्चफलकाय नमः

4-सुषुप्तिरूप प्रलयात्मने हंसतूलिकातल्पाय नमः

4-अविद्याऽज्ञान रूप हंसतूलिकामहोपधानाय नमः

4-समष्टि अहङ्कार रूप कौसुम्भास्तरणाय नमः

4-अव्यक्त महत्तत्वात्मने महावितानकाय नमः

4-योगमायारूप तिरस्करिण्यावृत महामायायवनिकायै नमः

4-ओं ऐं ह्रीं श्रीं ऐं क्लीं सौः ओं ह्रीं श्रीं हसक्षमलवरयूं सहक्षमलवरयीं यरलवक्षमलवरयूं ओं ह्रीं श्रीं ओं सौः क्लीं ऐं सत्व चित्व आनन्दत्व स्वरूप धर्मत्रय विनिर्मुक्त स्वयञ्ज्योति उपाधिरहित शुद्धसंविदात्मने श्री महाकामेश्वराय नमः

4-कएईलह्रीं हसकहलह्रीं सकलह्रींश्रीं महोड्याणपीठमध्ये कामेश्वराङ्काख्य

परशाम्भवपीठनिलये सर्वचक्रेश्वरीध्यात पञ्चश्री पञ्चकोश पञ्चकल्पलता पञ्चकामदुघा पञ्चरत्न बृन्दमण्डितासन संस्थित सर्वदर्शनसेवित षडङ्गयुवतीस्तुत चतुःसमयदेवतापूजित महासौभाग्यजनन महामोक्षप्रद शून्याशून्यविवर्जितशक्ति विवेकवृत्यवच्छिन्न सच्चिदानन्दधर्मात्मक सदानन्दपूर्ण स्वात्माभिन्न सर्वसाक्षिचिद्रूपाख्य सादाख्यकला परबैन्दव-वासिन्याख्याभासा परब्रह्म श्रीमन्महात्रिपुरसुन्दरी पराभट्टारिकायै नमः

(निरूपाधिक चैतन्यमेव सच्चिदानन्दात्मकं अन्तःकरण प्रतिबिंबितं सत् तद् अहं एव इत्यनुसन्धानं श्रीललितायाः लौहित्यं ।अभेद संबन्धेन सत्व चित्व आनन्दत्व विशिष्ट संविदः केवल संविदः च तादात्म्यं कामेश्वराङ्ग यन्त्रणं - एते द्वे विभावनीये)

4- ऐं क्लीं सौः-श्रीं ह्रीं क्लीं-कएईलह्रीं हसकहलह्रीं सकलह्रीं-हसकलह्रीं हसकहलह्रीं सकलह्रीं-हसकलहसकहलसकलह्रीं-क्लीं ह्रीं श्रीं-श्रीं सौः क्लीं-श्रीं ह्रीं ऐं-उपाध्यभाव शुक्लत्व उपलक्षित शुद्ध संविदात्म श्रीमहाप्रकाशचरणाय नमः

4- ऐं क्लीं सौः श्रीं ह्रीं क्लीं कएईलह्रीं हसकहलह्रीं सकलह्रीं हसकलह्रीं हसकहलह्रीं सकलह्रीं हसकलहसकहलसकलह्रीं क्लीं ह्रीं श्रीं श्रीं सौः क्लीं श्रीं ह्रीं ऐं चिद् विशिष्ट संविद् प्राथामिक पराहन्ता वृत्तिरूपेण रागेण उपलक्षित श्रीमहाविमर्शचरणाय नमः

4- ह्सौः स्हौः◌ं सर्वकल्पनापनयनार्थ सार परत्वात् एकात्म-प्रत्यय-सार परत्वाच्च एकरूप-एकरस-ऐक्य-प्रत्ययदाढ्र्यैव स्वात्माभाव अहमाकार चरणयोः अमित विशेषाविशेष्यभाव उभयसामरस्य प्रत्ययाभिन्नभूमास्वरूप महाप्रकाशविमर्शसामरस्य निर्वाणचरणाय नमः

6.नवावरण समष्टि मन्त्राः

4 (महाषोडशी) महोड्याणपीठनिलयां कामेश्वराङ्के श्रीशाम्भवपीठस्थां चतुष्षष्ठि उपचारेणतुष्टां षडङ्गयुवतीस्तुतां कामेश्वर्यादि पञ्चदशनित्या रूपिणीं मित्रेशानन्दनाथादियुगनाथेनपूजितां प्रकाशानन्दनाथादिनवनाथेननुतां मुनिवेदनागसंख्या-दिव्यसिद्धमानवौघेनार्चितां सर्वचक्रेश्वरीध्यातां पञ्चश्री-पञ्चकोश-पञ्चकल्पलता-पञ्चकामदुघा-पञ्चरत्न-बृन्दमण्डितासनसंस्थितां षड्दर्शन-षडाम्नाय-देवाताराधितां चतुस्समयदेवतापूजितां महामोक्षप्रदां सच्चिदानन्दधर्मात्मक सदानन्दपूर्ण सर्वसाक्षिचिद्रूपसादाख्यकलां स्वात्माभिन्नां शून्याशून्यविवर्जितशक्तिं परबैन्दवासिनी अनाख्याभासां श्रीललिता महात्रिपुरसुन्दरी पराभट्टारिका श्रीपादुकां पूजयामि तर्पयामि नमः

<u>प्रथमावरणः</u>

4 स्थूलदेहेपादयो र्सूक्ष्मदेहेमूलाधारदधोगताकुलसहस्रकर्णिकामध्ये आज्ञोपरि बिन्दौ अं आं सौः शुक्लारुणपीतवर्ण रेखात्रयात्मचतुरश्ररूप लकारप्रकृतिक पृथ्व्यात्मकस्य पूर्वाम्नायरूप निवृत्तिकलात्मक रतिस्थायीभाव नादशक्त्यात्मक अङ्गारकग्रहाख्य बिन्दुत्रयतेजोत्पत्तिवाग्रूप चतुर्दशार सर्वसौभाग्यदायक शक्तिचक्राभिरविनाभाव-संबन्ध-शिवचक्ररूप महासुखप्रद सृष्टिसृष्ट्यात्मक जाग्रदवस्थास्वरूप त्रैलोक्यमोहन चक्राधिष्ठात्री सर्वजीवेश्वरी अघोर कुब्जिकानुत अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं हं प्रकाशात्मक उन्मन्याकाशानन्दनाथ सेवित चार्वाकसिद्धान्तस्थापितचण्डिकारूपिणि बौद्धदर्शनदर्शित तारास्वरूपिणि दशमहाविद्याया धूमावत्यभिन्ना सिद्धाञ्जन-चिन्तामणि-शूल-कपालहस्त अणिमादिदश ब्राह्मीसदृश- मातृकाष्टक खड्ग-खेटक-मुद्राङ्कितहस्तद्वय सर्वसंक्षोभिण्यादि मुद्रादशक शृङ्गाररसात्म अष्टाविंशति प्रकटयोगिनि मयूखावृत अणिमासिद्धिसहित सर्वसंक्षोभिणिमुद्रा-दर्शनमुदिता स्फटिकाभ-मुक्ताभरण- पुस्तकाक्षमाला पद्मद्वयकर-त्रिपुराचक्रेश्वरीरूप-कामसुन्दर्याभिन्नश्रीललितामहात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

<u>द्वितीयवरणः</u>

4 स्थूलदेहेजान्वो र्सूक्ष्मदेहे अकुलसहस्रोपरिविषुवसंज्ञकरक्तवर्ण षड्दलकमल कर्णिकामध्ये बिन्द्वुपरि अर्धचन्द्रे ऐं क्लीं सौः श्वेतवर्णषोडश दलात्मक सकार प्रकृतिक षोडशकलात्मकचन्द्रस्वरूपे स्रवदमृतरसे पूर्वाम्नायरूप प्रतिष्ठा कलात्मक

उत्साहस्थायीभाव बिन्दुशक्त्यात्मक सोमग्रहाख्य वैखरीवाग्रूप दशारद्वय-सर्वार्थसाधक-सर्वरक्षाकर द्विशक्तिचक्राभिरविनाभाव संबन्ध शिवचक्ररूप सृष्टिस्थित्यात्मक स्वप्नावस्थास्वरूप सर्वाशापरिपूरक चक्राधिष्ठात्री सर्वमन्त्रेश्वरी वज्रकुब्जिकानुत लृं लॄं एं ऐं ओं औं अं अः सं विमर्शात्मक समाकाशानन्दनाथसेविता बौद्धसिद्धान्तस्थापितवज्रतारारूपिणि वैदिकदर्शन दर्शित गायत्रीस्वरूपिणि दशमहाविद्याया बगळादेव्यभिन्नां प्रवाळ वर्णखड्गखेटकशरचापधृत कामाकर्षणीनित्याकलादेव्यादि वीररसात्म-षोडश गुप्तयोगिनि मयूखावृत लघिमा सिद्धिसहित सर्वविद्राविणिमुद्रा दर्शनमुदिता शुभ्र वर्ण पाशाङ्कुशवराभयकर त्रिपुरेशी चक्रेश्वरीरूप तारसुन्दर्याभिन्न श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पू-त-नमः

<u>तृतीयावरणः</u>

4 स्थूलदेहे ऊरुमूलयो र्सूक्ष्मदेहेमूलाधारचतुर्दलकमलकर्णिकामध्ये अर्धचन्द्रोपरि रोधिन्यां ह्रीं क्लीं सौः जपाकुसुमसंकाश अष्टदलात्मक हकार प्रकृतिकऽष्ट-मूर्त्यात्मक शिवाभिन्ने पूर्वाम्नायरूप विद्याकलात्मक शोक स्थायीभाव कलाशक्त्यात्मक सूर्यग्रहाख्य वैखरीवाग्रूप अष्टार सर्वरोहर शक्ति चक्राभिरविनाभाव संबन्ध शिवचक्ररूप सृष्टिसंहारात्मक सुषुप्त्यावस्थास्वरूप सर्वासंक्षोभणचक्राधिष्ठात्री सर्वतन्त्रेश्वरी समयकुब्जिकानुत कं खं गं घं ङं क्षं आनन्दात्मक व्यापकाकाशानन्दनाथसेविता जैनसिद्धान्तस्थापित अर्हन्ता रूपिणि वैदिकदर्शन दर्शित गायत्रीस्वरूपिणि दशमहाविद्यायां त्रिपुरभैरव्यभिन्नां इक्षुचाप-पुष्पबाण उत्पल-पुष्पबन्धुधृत अनङ्गकुसुमादि करुणरसात्म अष्ट गुप्ततरयोगिनि मयूखावृत महिमा सिद्धिसहित सर्वाकर्षणिमुद्रा उन्मुद्रनमुदिता रक्तवर्ण-पुस्तकाक्षमाला-वराभयकर त्रिपुरसुन्दरिचक्रेश्वरीरूप रमासुन्दर्याभिन्न श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

<u>चतुर्थावरणः</u>

4 स्थूलदेहे नाभौ सूक्ष्मदेहेस्वधिष्ठानषड्दलकमलकर्णिकामध्ये रोधिन्योपरि नादे हैं ह्क्लीं ह्सौः दाडिमीप्रसूनसहोदरे चतुर्दशार ईकारप्रकृतिक चतुर्दशार भुवनात्मक महामायास्वरूप दक्षिणाम्नायरूप शान्ताकलात्मक भयानक स्थायीभाव ज्येष्ठाशक्त्यात्मक शनैश्चरग्रहाख्य मध्यमावाग्रूप चतुरश्रत्रयात्म त्रैलोक्यमोहन शिवचक्राभिरविनाभाव संबन्ध शक्तिचक्ररूप स्थितिसृष्ट्यात्मक ईश्वरोपासनातत्त्वस्वरूप सर्वसौभाग्यदायक चक्राधिष्ठात्री सर्वतत्त्वेश्वरी घोर

कुब्जिकानुत चं छं जं झं ञं मं ज्ञानात्मक शक्त्याकाशानन्दनाथसेविता सांख्य सिद्धान्तस्थापित मूलप्रकृतिरूपिणि सौरदर्शन दर्शित मार्ताण्डभैरव स्वरूपिणि दश महाविद्यायां भुवनेश्वर्यभिन्नां आग्नेयचाप-बाण-खड्ग-खेटकधर-सर्वसंक्षोभिण्यादि भयानकरसात्म चतुर्दशसंप्रदाययोगिनि मयूखावृत ईशित्वसिद्धिसहित सर्ववशंकरीमुद्रा समुन्मीलनमुदिता रक्तवर्ण पुस्तकाक्षमाला वराभयकर त्रिपुरवासिनीचक्रेश्वरीरूप माया सुन्दर्याभिन्न श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

पञ्चमावरणः

4 स्थूलदेहे हृदये सूक्ष्मदेहेमणिपूरकदशदलकमलकर्णिकामध्ये नादोपरि नादान्ते ह्सैं ह्स्क्लीं ह्सौः प्रभापराभूत सिन्दूरवर्णे बहिर्दशार एकारप्रकृतिक दशावतारात्मक विष्णुस्वरूपे दक्षिणाम्नायरूप शान्ताकलात्मक जुगुप्सा स्थायीभाव रौद्रीशक्त्यात्मक राहुग्रहाख्य मध्यमावाग्रूप षोडशदळ सर्वाशापरिपूरक शिवचक्राभिरविनाभाव संबन्ध शक्तिचक्ररूप स्थितिस्थित्यात्मक गुरूपसदनातत्त्वस्वरूप सर्वार्थसाधक-चक्राधिष्ठात्री सर्वपीठिश्वरी वीर कुब्जिकानुत टं ठं डं ढं णं लं सत्यात्मक ध्वन्याकाशानन्दनाथ सेविता वैदीक सिद्धान्तस्थापित गायत्रीरूपिणि वैष्णवदर्शन दर्शित विष्णुस्वरूपिणि दशमहाविद्यायां कमलात्मिकाभिन्ना परशु-पाश-गदा-घण्टाधर सर्वसिद्धिप्रदादि बीभत्सरसात्म-दश-कुलोत्तीर्णयोगिनि-मयूखावृत वशित्वसिद्धिसहित सर्वोन्मादिनी मुद्रा उद्घाटनमुदिता उद्यत्सूर्यसहस्राभ पुस्तकाक्षमाला -वराभयकर त्रिपुराश्रीचक्रेश्वरीरूप वाक्सुन्दर्याभिन्न श्रीललितामहात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

षष्ठावरणः

4 स्थूलदेहे कण्ठे सूक्ष्मदेहे अनाहतद्वादशदलकमलकर्णिकामध्ये नादान्तोपरि शक्तौ ह्रीं क्लीं ब्लें जपासुमनस्सहचरे अन्तर्दशार रेफप्रकृतिक दशकलात्मक वैश्वानराभिन्ने दक्षिणाम्नायरूप शान्ताकलात्मक क्रोधस्थायीभाव वामाशक्त्यात्मक केतुग्रहाख्य मध्यमावाग्रूप षोडशदळ सर्वाशापरिपूरक शिवचक्राभिरविनाभाव संबन्ध शक्तिचक्ररूप स्थितिसंहारात्मक श्रवणतत्त्वस्वरूप महाज्ञानप्रदसर्वरक्षाकरचक्राधिष्ठात्री सर्वयोगेश्वरी जयकुब्जिकानुत तं थं दं धं नं वं पूर्णातमक ध्वनिमात्राकाशानन्दनाथसेविता सौर सिद्धान्त स्थापित मार्ताण्ड भैरवरूपिणि वैष्णवदर्शन दर्शित विष्णुस्वरूपिणि दशमहाविद्याया मातङ्ग्याभिन्नां श्वेतवर्ण वज्र-शक्ति-तोमर-चक्रधर सर्वज्ञादि-अद्भुतरसात्म-दश-निगर्भयोगिनि-मयूखावृत प्राकाम्यसिद्धिसहित सर्वमहाङ्कुशमुद्रा अङ्कुरण मुदितां रक्तवर्ण पाशाङ्कुश-कपालाभयकर त्रिपुरमालिनीचक्रेश्वरीरूप

दिव्य सुन्दर्याभिन्न श्रीललितामहात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

सप्तमावरणः

4 स्थूलदेहे मुखे सूक्ष्मदेहे विशुद्धषोडशदलकमलकर्णिकामध्ये शक्तोपरि व्यापिकायां ह्रीं श्रीं सौः पद्मरागरुचिर अष्टार ककारप्रकृतिकऽष्टमूर्त्यात्मक कामेश्वरस्वरूपे पश्चिमाम्नायरूप शान्त्यातीतकलात्मक हास्यस्थायीभाव विषघ्नीशक्त्यात्मक बुधग्रहाख्य मध्यमावाग्रूप अष्टदळ-सर्वसंक्षोभणशिव चक्राभिरविनाभाव संबन्ध शक्तिचक्ररूप संहारसृष्ट्यात्मक मननतत्त्वस्वरूप सर्वरोगहरचक्राधिष्ठात्री सर्ववागीश्वरी सिद्धकुब्जिकानुत पं फं बं भं मं रं स्वभावात्मकानाहताकाशानन्दनाथ सेविता वैष्णवसिद्धान्तस्थापित विष्णुरूपिणि शाक्तदर्शन दर्शित भुवनेश्वरी स्वरूपिणि दशमहाविद्याया ताराऽऽभिन्नां रक्ताशोकपुष्पाभ चाप-बाण-वीणा-पुस्तकधर वशिन्यादि हस्यरसात्म अष्टरहस्ययोगिनिमयूखावृत भुक्तिसिद्धिसहित सर्वखेचरीमुद्रा उररीकरण मुदिता-शुभ्रवर्ण पाशाङ्कुशकपालाभयकर त्रिपुरासिद्धाचक्रेश्वरीरूप परा सुन्दर्याभिन्न श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

आयुधार्चनंः

4- नेत्रद्वये द्रां द्रीं क्लीं ब्लूं सः पद्मकैरवकल्हाराम्राशोकपञ्चपुष्परूपेभ्यो सर्वजम्भनेभ्यो रसास्वादरूपविघ्नहरेभ्यो शब्द स्पर्श रूप रस गन्ध पञ्च तन्मात्ररूपेभ्यो जितेन्द्रियतत्त्वस्वरूपेभ्यो बाणेभ्यो नमः बाणदेवता श्रीपादुकां पूजयामि तर्पयामि नमः

4- भ्रुवि धं पुण्ड्रेक्षुकोदण्डरूपाय सर्वसम्मोहनाय मनोरूपाय विक्षेपरूपविघ्न हराय अन्तर्मुखशुद्धमन तत्त्व स्वरूपाय धनुषे नमः धनुर्देवता श्रीपादुकां पू-त- नमः

4- कर्णे ह्रीं विद्रुमाकाराय सर्ववशीकरणाय रागस्वरूपाय काषायरूपविघ्नहराय तीव्र आत्मज्ञानेच्छा तत्त्व स्वरूपाय पाशाय नमः पाशदेवता श्रीपादुकां पू-त-नमः

4- नासायां क्रों रौप्यमयाय सर्वस्तम्भनाय क्रोधाकाराय लयरूपविघ्नहराय अनात्म नामरूप द्वेषतत्त्व स्वरूपाय अङ्कुशाय नमः अङ्कुशदेवता श्रीपादुकां पू-त-नमः

अष्टमावरणः

4 स्थूलदेहे नेत्रयॊ र्सूक्ष्मदेहे लम्बिकाग्रे अष्टदलकमलकर्णिकामध्ये व्यापिकोपरि समनायां ह्स्त्रैं ह्स्क्ल्रीं ह्स्त्रौः बन्धूकपुष्पबन्धुकिरणे त्रिकोण नाद प्रकृतिक गुणत्रयप्रधानत्रिशक्तिरूप रेखात्रयात्मक उत्तराम्नायरूप चिच्छक्तिकलात्मक विस्मय

स्थायीभाव दूतरी शक्त्यात्मक गुरुग्रहाख्य पश्यन्तीवाग्रूप महाबिन्दु-सर्वानन्दमय-शिवचक्राभिरविनाभावसंबन्ध शक्तिचक्ररूप संहारस्थित्यात्मक निधिध्यासनतत्त्वस्वरूप सर्वसिद्धिप्रदचक्राधिष्ठात्री भोगकुब्जिकानुत यं रं लं वं शं यं प्रतिभात्मकेन्द्राकाशानन्दनाथ सेविता शाक्त-सिद्धान्त -स्थापित भुवनेश्वरीरूपिणि शैवदर्शन दर्शित रुद्रस्वरूपिणि दशमहा- विद्याया छिन्नमस्ताऽभिन्नां चापबाणपानपात्रमातुलिङ्ग खड्गफलक नागपाश घण्टाधर कामेश्वर्यादि रौद्ररसात्म अतिरहस्ययोगिनित्रयमयूखावृत इच्छासिद्धि सहित सर्वबीजमुद्रा विनिर्दर्शनमुदिता-रक्तवण-पुस्तकाक्षमाला वराभयकर त्रिपुराम्बा चक्रेश्वरीरूप मोक्षसुन्दर्याभिन्न श्रीललितामहात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

<u>नवमावरणः</u>

4 स्थूलदेहे मूर्ध्नि सूक्ष्मदेहे आज्ञायां द्विदलकमलकर्णिकामध्ये समनोपरि उन्मन्यां महाबिन्दौ क16 उद्यत्सूर्यसहस्राभबिन्दौ बिन्दुप्रकृतिक परब्रह्मात्मक ऊर्ध्वानुत्तराम्नायरूप चिच्छक्तिकलात्मक समस्थायीभाव सर्वानन्दमय शक्त्यात्मक शुक्रग्रहाख्य परावाग्रूप त्रिकोणसर्वसिद्धिप्रदशक्तिचक्राभिरविनाभाव-संबन्ध शिवचक्ररूप संहारसंहारात्मक समाधितत्त्वस्वरूप महाकीर्तिप्रद सर्वानन्दमयचक्राधिष्ठात्री सर्वसिद्धेश्वरी मोक्षकुब्जिकानुत षं सं हं ळं क्षं ऊं सुभगात्मक बिन्द्वाकाशानन्दनाथ सेविता शैवसिद्धान्तस्थापित सदाशिवरूपिणि शाम्भवदर्शन दर्शिता कालसङ्कर्षिणि स्वरूपिणि दशमहाविद्याया वामेसुन्दरि दक्षिणे काळिकारूपेण दर्शनप्रद महोड्याणपीठनिलय कदम्ब वनान्तः हिरण्मय सहस्रदळकमल कर्णिकामध्य साध्यसिद्धासन प्रसूनतूलिकायां स्वसमाराकार वर्णवेषाढ्य श्रीमत्कामेश्वराङ्के स्वस्तिकासने उपविष्ट **विद्रुम**पाश **रौप्य**ाङ्कुश इक्षुचापपञ्च पुष्पबाणधर महात्रिपुरसुन्दरि शान्तरसात्म परापररहस्ययोगिनि प्राप्तिसर्वकामसिद्धिद्वयसहित सर्वयोनिसर्वत्रिखण्डामुद्राद्वय प्रदर्शनशितमुदिता-महात्रिपुरसुन्दरीचक्रेश्वर्यभिन्न निर्वाणसुन्दर्याभिन्न श्रीललितामहात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

<u>श्रीललितामहात्रिपुरसुन्दरी विशेषभाव मन्त्राः</u>

4-कएईलह्रीं हसकहलह्रीं सकलह्रीं श्रीसौभाग्यविद्यास्वरूपिणिश्रीमहात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

4-हसकलह्रीं हसकहलह्रीं सकलह्रीं चैतन्यविद्यास्वरूपिणि श्रीमहात्रिपुरसुन्दरी. नमः

4-हसकलहसकहलसकलह्रीं श्रीतुरीयविद्यास्वरूपिणि श्रीमहात्रिपुरसुन्दरी.. नमः

4-कएईलहसकहलसकलह्रीं श्रीपूर्तिविद्यास्वरूपिणि श्रीमहात्रिपुरसुन्दरी..नमः

a.चतुर्थावरण समष्टि मन्त्रा:

4 मूलाधारादि सुभगानन्दनाथाधिष्ठित गुदपर्यन्त अपानवायुचलित अलम्बुसानाडी स्वरूप अतलभुवनस्थित आकाशाधिकरणब्रह्मसूत्रबोधित श्रीं ह्रीं टं सर्वसंक्षिभिणिशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि पूर्णानन्दनाथाधिष्ठित गुह्यपर्यन्त नाग वायुचलित कुहूनाडीस्वरूप वितलभुवनस्थित प्राणाधिकरणब्रह्मसूत्रबोधित क्लीं ऐं ठं सर्वविद्राविणिशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि जठरपर्यन्त समान कृकर देवदत्तवायुचलित विश्वोदरानाडीस्वरूप सुतलभुवनस्थित ज्योत्याधिकरण ब्रह्मसूत्रबोधित सौः ॐ डं सर्वाकर्षिणिशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि सर्वावयपर्यन्त व्यान धनञ्जयवायुचलित वारुणानाडीस्वरूप रसातलभुवनस्थित आनन्दमयाधिकरण ब्रह्मसूत्रबोधित ह्रीं श्रीं ढं सर्वाह्लादिनीशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि पादपर्यन्त समान धनञ्जयवायुचलित हस्तिजिह्वानाडीस्वरूप तलातलभुवनस्थित इन्द्रप्राणाधिकरण ब्रह्मसूत्रबोधित क ए णं सर्वसम्मोहिनीशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि पादाङ्गुष्ठपर्यन्त समान वायुचलित यशोवतीनाडीस्वरूप महातलभुवनस्थित वैश्वानराधिकरणब्रह्मसूत्रबोधित ई ल तं सर्वस्तम्भिनीशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि प्रकाशानन्दनाथाधिष्ठितदक्षश्रोत्रपर्यन्त समान वायुचलित पयस्विनीनाडीस्वरूप पातलभुवनस्थित गुप्ताधिकरणब्रह्मसूत्रबोधित ह्रीं ह थं सर्वजृम्भिनीशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि श्रीसत्यानन्दनाथाधिष्ठिवामनेत्रपर्यन्त कूर्मवायुचलित गान्धारीनाडी स्वरूप भूःभुवनस्थित सर्वत्राधिकरणब्रह्मसूत्रबोधित स क दं सर्ववशङ्करीशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि श्रीज्ञानानन्दनाथाधिष्ठितदक्षनेत्रपर्यन्त कूर्मवायुचलित पूषानाडीस्वरूप भुवःभुवनस्थित अत्राधिकरणब्रह्मसूत्रबोधित ह ल धं सर्वरञ्जनीशक्ति श्रीपां-पू त नमः

4 मूलाधारादि विमर्शानन्दनाथाधिष्ठितवामश्रोत्रपर्यन्त समान वायुचलित शङ्खिनी नाडीस्वरूप स्वःभुवनस्थित गुहाधिकरणब्रह्मसूत्रबोधित ह्रीं स नं सर्वोन्मादिनीशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि आनन्दानन्दनाथाधिष्ठितजिह्वापर्यन्त समान वायुचलित सरस्वतीनाडी स्वरूप महःभुवनस्थित अन्तराधिकरणब्रह्मसूत्रबोधित क ल पं सर्वार्थसाधिनीशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि प्रतिभानन्दनाथाधिष्ठितवामनासापर्यन्त प्राणवायुचलित इडानाडीस्वरूप जनःभुवनस्थित अन्तर्याम्याधिकरणब्रह्मसूत्रबोधित ह्रीं सौः फं सर्वसम्पत्तिपूरणीशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि स्वभावानन्दनाथाधिष्ठितदक्षनासापर्यन्त प्राणवायुचलित पिङ्गलानाडी स्वरूप तपःभुवनस्थित अदृश्यत्वाधिकरणब्रह्मसूत्रबोधित क्लीं ऐं बं सर्वमन्त्रमयीशक्ति श्रीपादुकां पू त नमः
4 मूलाधारादि श्रीगुरु अमुकानन्दनाथाधिष्ठितब्रह्मरन्ध्रपर्यन्त उदानवायुचलित सुषुम्नानाडीस्वरूप सत्यभुवनस्थित भूमाधिकरणब्रह्मसूत्रबोधित ह्रीं श्रीं भं सर्वद्वन्द्वक्षयङ्करीशक्ति श्रीपादुकां पू त नमः

b.पञ्चमावरण समष्टि मन्त्रा:

४- मूलाधारदि प्रतिभस्वभावानन्दनाथाधिष्टित वामदक्षनासापर्यन्त ईडापिङ्गला नाडीद्वय चलित प्राणवायुरूप सुश्री वह्निकला प्रकाशित दशमहाविद्यायां कमलात्मिकाभिन्न मत्स्यावतारस्वरूप श्रीं कं सर्वसिद्धिप्रदादेवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- मूलाधारदि सुभगानन्दनाथाधिष्टित गुदपर्यन्त अलम्बुसानाडी चलित अपानवायुरूप धूम्रार्चि वह्निकला प्रकाशित दशमहाविद्यायां धूमावत्याभिन्न वामनावतारस्वरूप ह्रीं खं सर्वसंपत्प्रदादेवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- मूलाधारदि सर्वावयवपर्यन्त वारुणानाडी चलित व्यानवायुरूप उष्मा वह्निकला प्रकाशित दशमहाविद्यायां ताराभिन्न रामावतारस्वरूप क्लीं गं सर्वप्रियंकरी देवीश्रीपादुकां पूजयामि तर्पयामि नमः

४- मूलाधारदि श्री गुरु अमुकाननदनाथाधिष्टित ब्रह्मरन्ध्रपर्यन्त सुषुम्नानाडी चलित उदानवायुरूप ज्वालिनी वह्निकला प्रकाशित दश महाविद्यायां भुवनाभिन्न वराहावतार स्वरूप ऐं घं सर्वमङ्गलकारिणी देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- मूलाधारदि प्रकाशविमर्शानन्दनाथाधिष्टित वामदक्षश्रोत्र पर्यन्त शङ्खिनी पयस्विनी नाडीद्वय आनन्दानन्दनाथाधिष्टित जिह्वा पर्यन्त सरस्वतीनाडी जठरपर्यन्त विश्वोदरा नाडी चलित समानवायुरूप हव्य वाहिनीवह्नि कलाप्रकाशित दश महाविद्यायां मातङ्ग्याभिन्न बलभद्रावतारस्वरूप सौः ङं सर्वकामफलप्रदा देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- मूलाधारदि पूर्णानन्दनाथाधिष्टित गुह्यपर्यन्त कुहूनाडी चलित नागवायुरूप कपिलावह्नि कला प्रकाशित दश महाविद्यायां छिन्नमस्ताभिन्न परशुरामावतारस्वरूप ॐ चं सर्वदुःखविमोचिनीदेवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- मूलाधारदि जठरपर्यन्त विश्वोदरा नाडी चलित कृकरवायुरूप विस्फुलिङ्गिनी वह्नि कला प्रकाशित दश महाविद्यायां त्रिपुरभैरव्याभिन्न नृसिंहावतारस्वरूप ह्रीं छं सर्व मृत्यु प्रशमनी देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- मूलाधारदि श्रीसत्यश्रीज्ञानानन्दनाथाधिष्टित दक्षवामनेत्रपर्यन्त गान्धारी पूषानाडीद्वय चलित कूर्मवायुरूप ज्वलिनीवह्निकलाप्रकाशित दशमहाविद्यायां बगलाभिन्न कूर्मावतारस्वरूप श्रीं जं सर्वविघ्ननिवारिणी देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- मूलाधारदि जठरपर्यन्त विश्वोदरा नाडी पादपर्यन्त हस्तिजिह्वा नाडी चलित देवदत्त वायुरूप कव्य वाहिनीवह्नि कला प्रकाशित दश महाविद्यायां कालिकाभिन्न कृष्णावतार स्वरूप क झं सर्वाङ्गसुन्दरी देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- मूलाधारदि सर्वावयवपर्यन्त वारुणानाडी पादपर्यन्त हस्तिजिह्वा नाडी चलित धनञ्जयवायुरूप सुरूपा वह्नि कला प्रकाशित दश महाविद्यायां सुन्दर्यभिन्न कल्क्यावतारस्वरूप ए ञं सर्व सौभाग्यदायिनी देवी श्रीपादुकां पूजयामि तर्पयामि नमः

c.षष्टावरण समष्टि मन्त्रा:

४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित जाठराग्न्यांशभूत हव्य वाहिनीवह्नि कलारूप दश महाविद्यायां मातङ्ग्याभिन्न बलभद्रावतारस्वरूप रेचकाग्न्यात्मक ई मं सर्वज्ञादेवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित जाठराग्न्यांशभूत शोचकाग्न्यात्मक विस्फुलिङ्गिनीकलारूप दशमहाविद्यायां त्रिपुरभैरव्याभिन्न नृसिंहावतारस्वरूप ल यं सर्वशक्तिदेवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित जाठराग्न्यांशभूत पाचकाग्न्यात्मक सुश्री वह्निकलारूप दशमहाविद्यायां कमलात्मिकाभिन्न मत्स्यावतारस्वरूप ह्रीं रं सर्वैश्वर्यप्रदा देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित जाठराग्न्यांशभूत दाहकाग्न्यात्मक ज्वालिनी वह्निकलारूप दशमहाविद्यायां भुवनाभिन्न वराहावतार स्वरूप ह लं सर्वज्ञानमयी देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित जाठराग्न्यांशभूत प्लावकाग्न्यात्मक धूम्रार्चिवह्निकलारूप दशमहाविद्यायां धूमावत्याभिन्न वामनावतारस्वरूप स वं सर्वव्याधि-विनाशिनी देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित क्षारकाग्न्यात्मक ज्वालिनी कलारूप दशमहाविद्यायां बगलाभिन्न कूर्मावतारस्वरूप क शं सर्वाधारस्वरूपा देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित उद्गारकाग्न्यात्मक उष्मा वह्निकलारूप दश महाविद्यायां ताराभिन्न रामावतारस्वरूप ह षं सर्वपापहरादेवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित क्षोभकाग्न्यात्मक सुरूपा वह्नि कलारूप दशमहाविद्यायां सुन्दर्यभिन्न कल्क्यावतारस्वरूप ल सं सर्वानन्दमयी देवी श्रीपादुकां पूजयामि तर्पयामि नमः

४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित जृम्भकाग्न्यात्मक कपिलावह्नि कलारूप दशमहाविद्यायां छिन्नमस्ताभिन्न परशुरामावतारस्वरूप स्वरूप ह्रीं हं सर्वरक्षास्वरूपिणी देवी श्रीपादुकां पूजयामि तर्पयामि नमः
४- भक्ष्य भोज्य चोष्य लेप्य पेयात्मक पञ्चविधमन्नपाचित मोहकाग्न्यात्मक कव्य वाहिनीवह्नि कलारूप दशमहाविद्यायां कालिकाभिन्न कृष्णावतार स क्षं सर्वेप्सितफलप्रदादेवी श्रीपादुकां पूजयामितर्पयामि नमः

7.Dvādaśa upāsakāḥ

In all tantras and stotras we find a reference to twelve upāsakā, a completely different approach in each manner to the Divine Mother śrī Lalitā, by the devatā, ṛṣi and men. This discussion is on the variations observed in them.

Jñānārṇava tantra, a śrī Kula tantrā, in the thirteenth chapter visualizes these mantras and gives an elucidation of the same. The following are the mantras envisaged (deciphered from the text) by twelve aspirants, as a result of their continuous sādhana--

1. काम उपासिता विद्या- कएईलह्रीं हसकहलह्रीं सकलह्रीं
2. मनु उपासिता विद्या- कहएईलह्रीं हकएईलह्रीं सकएईलह्रीं
3. अगस्त्य उपासिता विद्या- कएईलह्रीं हसकहलह्रीं सहसकलह्रीं
4. इन्द्र उपासिता विद्या- कएईलह्रीं हसकहलह्रीं सलकह्रीं
5. लोपामुद्रा उपासिता विद्या- हसकलह्रीं हसकहलह्रीं सकलह्रीं
6. सूर्य उपासिता विद्या- हसकलह्रीं हकहलह्रीं सहकलह्रीं
7. कुबेर उपासिता विद्या- हसकएईलह्रीं हसकहएईलह्रीं हसकएईलह्रीं
8. चन्द्र उपासिता विद्या - सहकएईलह्रीं सहकहएईलह्रीं सहकएईलह्रीं
9. नन्दि उपासिता विद्या- सएईलह्रीं सहकहलह्रीं सकलह्रीं
10. शङ्कर उपासिता विद्या- हसकलह्रीं हसकहलह्रीं सकलह्रीं हसकलहसकहलसकलह्रीं
11. विष्णु उपासिता विद्या-हसकलह्रीं हसकहलह्रीं सकलह्रीं सएईलह्रीं सहकहलह्रीं सकलह्रीं
12. दूर्वास उपासिता विद्या- कएईलहरी हसकहलहरी सकलहरी

In the chapter on devī darśana dīkṣā in lalitopākhyānā śrī Hayagrīva instructs sage agastya a puṣpāñjalī by the āvaraṇa sahasrākṣarī which ends as-
'...महेश माधव विधातृ मन्मथ स्कन्द नन्दीन्द्र मनु चन्द्र कुबेरागस्त्य दूर्वासःक्रोधभट्टारक विद्यात्मिके- Only two are changes are seen. śrī Devi Lopāmudrā and śrī

Sūryā are substituted by śrī Brahma and śrī skanda. Only rituals and methodologies for the kādi vidyā of śrī Manmatha is seen in the subsequent chapters, the rest upasaka mantras are not discussed there. The mantra envisaged by Lord Skanda is seen in śrī vidyārṇava tantra (discussed below). Mantra worshipped by Lord Brahmā is seen in Trailokya mohana kavaca as-

1. विधातृ उपासिता विद्या- कएईलह्रीं हकहलह्रीं हसकलह्रीं

In śrī vidyārṇava tantra we find a reference to above Jñānārṇava tantra list of upasakā and also from another tantra (tantrāntare), which is--

मनुश्चन्द्र- कुबेरश्च लोपामुद्रा च कामराट् *
अगस्त्य नन्दी सूर्यश्च विष्णु स्कन्द शिवस्तथा *
दुर्वाससश्च महादेव्या द्वदशोपासका- स्मृताः

In prapañca sara sara sangraha we find the same list, only composition of the sloka is slightly different,

मनुं चन्द्रं कुबेरं च लोपामुद्रां च मन्मथं*
अगस्त्यं नन्दिकेश च सूर्यं विष्णुं च षण्मुखं*
शिवं दुर्वाससं चादौ क्रमेणान्ते समर्चयेत्.

Their elucidative slokas, for all these mantras, are seen in prapañca sara sara sangraha and also decoded by its author, variance with respect to Jñānārṇava is as below--

1. कुबेर उपासिता विद्या- हसकएईलह्रीं हसकहएईलह्रीं सहकएईलह्रीं
2. चन्द्र उपासिता विद्या - सहकएईलह्रीं सहकहएईलह्रीं हसकएईलह्रीं

We find the mantra worshipped by Skanda as-

3. स्कन्द उपासिता विद्या- हसकलह्रीं हसकसकलह्रीं सहकहलह्रीं

In a stotra of a hundred stanzas in antādi style in tamil on Devi Abirami of Thirukadavur by Abirami bhatta, refers to the twelve upāsakā in the 85th stanza as (names are translated) Surya, Candra, Agni, kubera, Indra, Brahma, Vishnu, Shiva, Agastya, Skanda, Gaṇapati and Kāmadeva. Here an addition to above

said we are amazed to see Gaṇeśa and agni deva. Mantra worshipped by śrī Agni deva is seen in śrī vidyārṇava, when the list of upāsakā was expanded to twenty five. However, mantra worshipped by śrī Gaṇeśa is not seen.

4. अनिलोपासिता **विद्या-** 4-कसकलह्रीं हसलकलह्रीं सकलरलह्रीं

ஆதித்தன், அம்புலி, அங்கி குபேரன், அமரர்தம் கோன்,
போதிர் பிரமன் புராரி, முராரி பொதியமுனி,
காதிப் பொருபடைக் கந்தன், கணபதி, காமன் முதல்
சாதித்த புண்ணியர் எண்ணிலர் போற்றுவர், தையலையே

Interestingly we can see the list of twelve upāsakā (in the Lalitā sahasranāma --

1. **Kamāsevitā(586)** - Worshipped by Lord Manmatha
2. **Manuvidyā(238)** - Worshipped by Lord Manu, propagator of the mankind
3. **tāpasārādhyā(359)* Sanakādi samrādhyā (726)**-Worshipped by the sages viz. agastyā, durvāsā, four Sanakādi sages
4. **Haribrahmendrasevitā(297)** - Worshipped by Lord Vishnu, Lord Brahma and Indra
5. **MahāBhairavapūjitā(231)** - Worshipped by Lord Bhairavaa (Shiva)
6. **Lopāmudrārcitā(647)** - Worshipped by śrī Devi Lopamudra, wife of Sage Agastya
7. **Rājarājārcitā(305)** - Worshipped by Lord Kubera, (also called as rājarāja)
8. **śivārādhyā (406)** - Worshipped by Lord Shiva
9. **Kamalākṣaniṣevitā(558)** - Worshipped by Lord Vishnu
10. **Mārtāṇdabhairavārādhyā(785)** - Worshipped by Lord Surya (sun)
11. **Candravidyā(239)** - Worshipped by Lord Candra (Moon)
12. **Nandividyā(733)** - Worshipped by Lord Nandi

